শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্ৱেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে

# ॥ প্রস্তাৱপদ্ধতিঃ প্রথমা ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

# ॥ প্রস্তাৱপদ্ধতিঃ প্রথমা ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

সন্তঃ শ্রীরঙ্গপৃথ্ৱীশচরণত্রাণশেখরাঃ।
জযন্তি ভুৱনত্রাণপদপঙ্কজরেণৱঃ ॥ **1.1** ॥

ভরতায পরং নমোঽস্তু তস্মৈ প্রথমোদাহরণায ভক্তিভাজাম্।
যদুপজ্ঞমশেষতঃ পৃথিৱ্যাং প্রথিতো রাঘৱপাদুকাপ্রভাৱঃ ॥ **1.2** ॥

ৱর্ণস্তোমৈর্ৱকুলসুমনোৱাসনামুদ্ৱহন্তীম্
    আম্নাযানাং প্রকৃতিমপরাং সংহিতাং দৃষ্টৱন্তম্।
পাদে নিত্যপ্রণিহিতধিযং পাদুকে রঙ্গভর্তুঃ
    ৎৱন্নামানং মুনিমিহ ভজে ৎৱামহং স্তোতুকামঃ ॥ **1.3** ॥

দিৱ্যস্থানাৎ ৎৱমিৱ জগতীং পাদুকে গাহমানা
    পাদন্যাসং প্রথমমনঘা ভারতী যত্র চক্রে।
যোগক্ষেমং সকলজগতাং ৎৱয্যধীনং স জানন্
    ৱাচং দিৱ্যাং দিশতু ৱসুধাশ্রোত্রজন্মা মুনির্মে॥ **1.4** ॥

নীচেঽপি হন্ত মম মূর্ধনি নির্ৱিশেষং
    তুঙ্গেঽপি যন্নিৱিশতে নিগমোত্তমাঙ্গে।
প্রাচেতসপ্রভৃতিভিঃ প্রথমোপগীতং
    স্তোষ্যামি রঙ্গপতিপাদুকযোর্যুগং তৎ॥ **1.5** ॥

ধত্তে মুকুন্দমণিপাদুকযোর্নিৱেশাৎ
    ৱল্মীকসম্ভৱগিরা সমতাং মমোক্তিঃ।
গঙ্গাপ্রৱাহপতিতস্য কিযানিৱ স্যাৎ
    রথ্যোদকস্য যমুনাসলিলাদ্বিশেষঃ॥ **1.6**॥

ৱিজ্ঞাপযামি কিমপি প্রতিপন্নভীতিঃ
    প্রাগেৱ রঙ্গপতিৱিভ্রমপাদুকে ৎৱাম্।
ৱ্যঙ্‌ক্তুং ক্ষমাস্সদসতী ৱিগতাভ্যসূযাঃ
    সন্তঃ স্পৃশন্তু সদযৈর্হৃদযৈঃ স্তুতিং তে॥ **1.7**॥

অশ্রদ্দধানমপি নন্ৱধুনা স্ৱকীযে
    স্তোত্রে নিযোজযসি মাং মণিপাদুকে ৎৱম্।
দেৱঃ প্রমাণমিহ রঙ্গপতিস্তথাৎৱে
    তস্যৈৱ দেৱি পদপঙ্কজযোর্যথা ৎৱম্॥ **1.8**॥

যদাধারং ৱিশ্ৱং গতিরপি চ যস্তস্য পরমা
    তমপ্যেকা ধৎসে দিশসি চ গতিং তস্য রুচিরাম্।
কথং সা কংসারের্দ্রুহিণহরদুর্বোধমহিমা
    কৱীনাং ক্ষুদ্রাণাং ৎৱমসি মণিপাদু স্তুতিপদম্॥ **1.9**॥

শ্রুতপ্রজ্ঞাসম্পন্মহিতমহিমানঃ কতিকতি
    স্তুৱন্তি ৎৱাং সন্তঃ শ্রুতিকুহরকণ্ডূহরগিরঃ।
অহং ৎৱল্পস্তদ্ৱদ্যদিহ বহু জল্পামি তদপি
    ৎৱদাযত্তং রঙ্গক্ষিতিরমণপাদাৱনি ! ৱিদুঃ॥ **1.10**॥

যদেষ স্তৌমি ৎৱাং ত্রিযুগচরণত্রাযিণি ! ততো
    মহিম্নঃ কা হানিস্তৱ মম তু সম্পন্নিরৱধিঃ।
শুনা লীঢা কামং ভৱতু সুরসিন্ধুর্ভগৱতী
    তদেষা কিম্ভূতা স তু সপদি সন্তাপরহিতঃ॥ **1.11**॥

মিতপ্রেক্ষালাভক্ষণপরিণমৎপঞ্চষপদা
    মদুক্তিস্ত্বয্যেষা মহিতকৱিসংরম্ভৱিষযে।
ন কস্যেযং হাস্যা হরিচরণধাত্রি ! ক্ষিতিতলে
    মুহুৰ্ৱাত্যাধূতে মুখপৱনৱিষ্ফূর্জিতমিৱ ॥ **1.12** ॥

নিস্সন্দেহনিজাপকর্ষৱিষযোৎকর্ষোঽপি হর্ষোদয -
    প্রত্যূঢক্রমভক্তিৱৈভৱভৱদ্বৈযাত্যৱাচালিতঃ।
রঙ্গাধীশপদত্রৱর্ণনকৃতারম্ভৈর্নিগুম্ভৈর্গিরাং
    নর্মাস্বাদিষু ৱেঙ্কটেশ্ৱরকৱির্নাসীরমাসীদতি ॥ **1.13** ॥

রঙ্গক্ষ্মাপতিরত্নপাদু ! ভৱতীং তুষ্টূষতো মে জৱাৎ
    জৃম্ভন্তাং ভৱদীযশিঞ্জিতসুধাসন্দোহসন্দেহদাঃ।
শ্লাঘাঘূর্ণিতচন্দ্রশেখরজটাজঙ্ঘালগঙ্গাপযঃ
    ত্রাসাদেশৱিশৃঙ্খলপ্রসরণোৎসিক্তাঃ স্ৱযং সূক্তযঃ ॥ **1.14** ॥

হিমৱন্নলসেতুমধ্যভাজাং
    ভরতাভ্যর্চিতপাদুকাৱতংসঃ।
অতপোধনধর্মতঃ কৱীনাম্
    অখিলেষ্ৱস্মি মনোরথেষ্ৱবাহ্যঃ ॥ **1.15** ॥

অনিদম্প্রথমস্য শব্দরাশেঃ
    অপদং রঙ্গধুরীণপাদুকে ! ৎৱাম্।
গতভীতিরভিষ্টুৱন্ ৱিমোহাৎ
    পরিহাসেন ৱিনোদযামি নাথম্ ॥ **1.16** ॥

ৱৃত্তিভির্বহুৱিধাভিরাশ্রিতা
    ৱেঙ্কটেশ্ৱরকৱেঃ সরস্ৱতী।
অদ্য রঙ্গপতিরত্নপাদুকে !
    নর্তকীৱ ভৱতীং নিষেৱতাম্ ॥ **1.17** ॥

অপারকরুণাম্বুধেস্তৱ খলু প্রসাদাদহং
ৱিধাতুমপি শক্নুযাং শতসহস্রিকাং সংহিতাম্।
তথাপি হরিপাদুকে ! তৱ গুণৌঘলেশস্থিতেঃ
উদাহৃতিরিযং ভৱেদিতি মিতাঽপি যুক্তা স্তুতিঃ॥ **1.18** ॥

অনুকৃতনিজনাদাং সূক্তিমাপাদযন্তী
মনসি ৱচসি চ ৎৱং সাৱধানা মম স্যাঃ।
নিশমযতি যথাসৌ নিদ্রযা দূরমুক্তঃ
পরিষদি সহ লক্ষ্ম্যা পাদুকে ! রঙ্গনাথঃ॥ **1.19** ॥

ৎৱযি ৱিহিতা স্তুতিরেষা পদরক্ষিণি ! ভৱতি রঙ্গনাথপদে।
তদুপরি কৃতা সপর্যা নমতামিৱ নাকিনাং শিরসি॥ **1.20** ॥

॥ ইতি শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্ৱেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে প্রস্তাৱপদ্ধতিঃ প্রথমা॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥